ओं सत्गुरुभ्यो नमः

अस्य श्री बुधस्तोत्र महा मन्त्रस्य
वसिष्ठ ऋषि अनुष्टुप् छन्दः बुधो देवता
बुध प्रीत्यर्त्थे जपे विनियोगः

**ध्यानं**

भुजैश्चतुर्भिर्वरदा ऽ भयासि
गदा वसन्तंसुमुखं प्रशान्तं
पीतप्रभं चन्द्रसुतं सुरेड्यं
सिंहे निषण्णं बुधमाश्रयामि (1)

पीतांबरः पीतवपुः
पीत ध्वजरथस्तितः
पीयूष रश्मितनयः
पातुमां सर्व्वदा बुधः (2)

सिंहवाहं सिद्धनुतं
सौम्यं सौम्यगुणान्वितं
सोमसूनुं सुराराद्ध्यं
सर्व्वदा सौम्यमाश्रये (3)

बुधं बुद्धिप्रदातारं
बाणबाणासनोज्वलं
भद्रप्रदं भीतहरं
भक्तपालनमाश्रये (4)

आत्रेयगोत्रसंजातं
आश्रितार्त्तिनिवारणं
आदितेय कुलाराद्ध्यं
आशु सिद्धितमाश्रये (5)

कलानिधि तनूजातं
करूणारसवारिधिं

कल्याणदायिनं नित्यं
कन्या राश्याधिपं भजे (6)

मन्दस्मित मुखांभोजं
मन्मथायुतसुन्दरं
मिथुनाधीशमनघं
मृगाङ्कतनयं भजे (7)

चतुर्भुजं चारुरूपं
चराचर जगत्प्रभुं
चर्म्म खट्गधरं वन्दे
चन्द्रग्रहतनूत्भवं (8)

पञ्चास्य वाहनगतं
पञ्चपातकनाशनं
पीतगन्धं पीतमाल्यं
बुधं बुधतनुं भजे (9)

बुद्धस्तोत्रमिदं गुह्यं
वसिष्ठेनोदितं पुरा
यः पठेच्छ्रुणुयात्वापि
सर्व्वाभीष्टमवाप्नुयात् (10)

**श्रीबुधस्तोत्रं सम्पूर्णं**